Volume-01
Issue-01
Jan-2019

ISSN: 2663-0931(Print)
ISSN: 2663-2594(online)
International Journal of
Interdisciplinary Current Advanced Research
www.ijicar.in

# पञ्चतन्त्रेमित्रभेदे व्यक्तित्वविकासः, पिङ्गलकपात्रमुखेन प्रकाशिता सात्विकीप्रवृत्तिः

*[1]Hemalatha D, [2]Padmanabham G.

*[1]Research Scholar, Deptartment of Sanskrit S.V.University, Tirupati, India.
[2]Professor, Department of Sanskrit S.V.University, Tirupati, India.

Note: * Indicates corresponding author

**ARTICLE DETAILS**

**Article History:**
*Received Date: 16/01/2019*
*Revised Date: 26/01/2019*
*Accepted Date: 30/01/2019*
*e-First: 10/02/2019*

**Keywords**

***Corresponding Author**
*Email: hema.sanskrit@gmail.com*
(Hemalatha D)

**ABSTRACT**

साहित्यप्रयोजनेषु लोकव्यवहारज्ञानम् एकं प्रयोजनं निर्दिष्टम्। ‘काव्यं यशसेऽर्थकृते ....’ इति काव्यप्रकाशकारिकायां यशः, सम्पत्, लोकव्यवहारज्ञानम्, अशुभनाशः, रसानन्दः कान्तासम्मितरूपेण उपदेशकरणमिति षट् प्रयोजनानि मम्मटेन निरूपितानि। तेषु कान्तासम्मितरूप उपदेशेन लोकव्यवहारज्ञानोपदेशः उपदेशेनैव कथाकथनरूपेण आनन्दजनकत्वमिति त्रीणि प्रयोजनानि एकीकृत्य बोधनं पञ्चतन्त्रहितोपदेशयोः परमं प्रयोजनमुद्दिष्टम्।

अभीष्टं प्रयोजनं च व्यक्तिविषयकं श्रेयः च समाजविषयकं एकैकोऽपि व्यक्तिः स्वयं समाजश्रेयसे यतेत। समाजः मनुष्याणां समूहः, पशूनां च समूहः समजः इत्युच्यते। एष भेदः ‘समुदोरजः पशुषु’[१] इति पाणिनीयसूत्रे स्पष्टं प्रतिपादितः। यो मनुषः समाजश्रेयसे न यतते तत् विधानां समूहः समजः एव भवति। एवं निश्चित्यैव विष्णुशर्मा राजपुत्रान् तेषु व्यक्तित्वविकासं सम्पाद्य समाजोपयोगिनः कर्तुं पञ्चतन्त्रकथाः उक्तवान्। अतः व्यक्तित्वविकास एव ग्रन्थद्वयस्य मुख्यं प्रयोजनं भवति।

## व्यक्तिशब्दार्थः–

सामान्य अवयवसंस्थानेन ज्ञेया जातिः भवति, पृथक् जातिलक्षणसमन्वयेन ज्ञेयः व्यक्तिः भवतीति कोशेषु व्यक्तिशब्दार्थः निरूपितः। ‘जातिर्जातं च सामान्यं व्यक्तिस्तु पृथकात्मता’[२] इत्यमरः। जातिशब्दः जातशब्दः च गणवाचकौ दृश्येते किन्तु ‘अनुगतसंस्थान–विशेषव्यङ्ग्यजातिः’ इति जातिशब्दार्थः वैयाकरणैः निरुक्तः। ‘आकृति ग्रहणा जातिः’ इति तल्लक्षणमपि उक्तम्। प्रायशः त्वप्रत्ययन्तेन जातिः निरूप्यते यदा–गोत्व, मनुष्यत्वमिति। ‘जनी प्रादुर्भावे क्तिच्क्तौ च’[३] इति क्तिच्। ‘जनसन .......’[४] इत्यादिनात्वम्। तितुत्र–७/२१ इति नेट्।

© IJICAR 2019, All Rights Reserved 

एवम् एकरूपेण जातानां व्यक्तीनां समूहः जातिरिति जातिशब्दार्थः सिद्धः। यदा गौः एका व्यक्तिः, गोत्वं जातिः, गो संघः अपि जातिः। 'व्यक्तिस्तु पृथगात्मता' इति तल्लक्षणं एकस्मिन् अन्वितेऽपि जातिबोधक क्तच्प्रत्ययान्तस्तु विशेषतया लक्षमणसमन्वितस्य व्यक्तेः गुणबोधने रूढः।

**व्यक्तिशब्दस्योत्पत्तिः–**

वि इति उपसर्गपूर्वकात् अञ्ज् गत्यादिषु इति धातोः व्यज्यते अनया इति विग्रहे अञ्जू व्यक्त्यादौ। 'स्त्रियां क्तिन्'[५]। 'व्यनक्ति वा क्तिच्'[६]। पृथगात्मा यस्य, तस्य भावः। किन्तु क्त प्रत्ययः तद्धितः वृत्तेः अर्थान्तरोपसंक्रान्ति भवत्येव। अतः मानवस्य यः स्वभावो वर्तते तस्य निरूपकमिदं पदं वर्तते।

जगति जातः एकैकोऽपि मानवः इतरमानवसाधारणगुणात् कांश्चित् दददपि, स्वसाधारणानपि कांश्चन धर्मान् धत्ते एव। एवं व्यक्तौ मानवे स्थिताः ये साधारण असाधारणाश्च गुणाः ते तम् अन्येभ्यो मानवेभ्यः पृथक्कृत्वा प्रदर्शयन्तीति तेषां धर्माणां समुदायः एव मानवगतव्यक्तित्वे अवगम्यते।

**व्यक्तित्वविकासे कारणानि–**

प्रायशः मातापितरौ कस्यापि व्यक्तेः व्यक्तित्वस्य कारणं भवतः इति लोके व्यवहारः वर्तते। अत एव पितुः कारणमिति व्यवहारः काव्येषु दृष्टः। भौतिकः आकारः गुणैः प्रमाणेन च औन्नत्यम् इत्यादि गुणाः पितुः सङ्क्रामन्तीति कवीनामाशयः यदाह कालिदासः–

**रूपं तदोजश्वी तदेववीर्यं**
**तदैव नैसर्गिकमुन्नतत्वम्।**
**न कारणात्स्वात् भिभ्यते कुमारः**
**प्रवर्तितो दीप इव प्रदीपात्।।**[७]

© IJICAR 2019, All Rights Reserved 

कारणगुणाः कार्ये सङ्क्रामन्तीति शास्त्रेष्वपि व्यवहारः दृश्यते। वंशादिः अपि कारणं भवति, अभिजातस्य गुणाः उन्नताः भवन्ति नीचकुलोत्पन्नस्य नीचाः इति लोके व्यवहारो दृश्यते। प्रायशः यद्यपि अभिजनः पितरं व्यक्तित्वस्थितेः कारणं भवतः, तथापि सखायः, गुरवः परिसरश्च व्यक्तित्वविकासे कारणं भवतीति वक्तुं शक्यते। एतेषां पञ्चानां सम्भूय वा पृथग्वा कारणत्वं भवत्येव। भासस्तु व्यक्तित्वविकासे आचार्यः एव कारणं भवतीति स्पष्ठमुक्तवान्।

**पिङ्गलकः–**

पिङ्गलकः प्रकृत्या सद्गुणवान् किन्तु दुष्टेन दमनकमन्त्रेण उपजापितः आश्रिते सञ्जीवके अनार्यम् आचरितवान्। सर्वदा दीनेषु दया कार्य तुल्यबले यथावसरं कोपं कार्यमिति विश्वसिति। प्रथमं सञ्जीवकमधिकृत्य दमनक मुखात् श्रुतवान् तदा यद्यसौ विधेयः तदा न वद्यः इति उक्तवान् तदानीं पिङ्गलकवाक्यानि सत्वानुरूपं तस्य व्यक्तित्वं निरूपयति।

पिङ्गलक आह–सत्यं दृष्टं भविष्यति भवता। न दीनोपरि महान्तः कुप्यन्तीति न त्वं तेन निपातितः। यतः –

**तृणानि नोन्मूलयति प्रभञ्जनो मृदूनि नीचैः प्रणतानि सर्वतः।**
**स्वभाव एवोन्नतचेतसामयं महान्महत्स्वेव करोति विक्रमम्।।**[८]

अपि च –

**गण्डस्थलेषु मदवारिषु बद्धराग–**
**मत्तभ्रमद्भ्रमरपादतलाहतोऽपि।**
**कोपं न गच्छति नितान्तबलोऽपि नाग**
**स्तुल्ये बले तु बलवान् परिकोपमेति।।**[९]

© IJICAR 2019, All Rights Reserved 

पिङ्गलकः प्रकृत्या साधुः अतः साधुवर्तनेन सञ्जीवकेन गाढां मैत्रीं कृतवान्। किन्तु अयोग्ये विश्वासं कृत्वा तस्मिन् राज्यरक्षणभारं निवेशितवान्। करटकदमनक निक्षिप्तराज्यभारत्वात् स नष्टः।

इदमत्र व्यक्तित्वविकाससाधने कारणमूह्यम्–यत् स्वयं बलवान् विज्ञानवान् लब्ध योग्यसमागमः तथापि प्रमादेनापि स्वकर्तव्यं परेषु न निक्षिपेत्। विशेषतः कपटवर्तिनी स्वभारं न विन्यस्येदिति। तथा कृत्वा प्रभुरपि नष्टो भविष्यतीति। विशेषतः अधिकारिभिः खलाः अविश्वास्याश्च दूरतो वर्जनीयाः। इयमेव नीतिः पुराणेष्वपि दृष्टा –

**न विश्वसेदविश्वसस्ते विश्वस्ते नातिविश्वसेत्।**
**विश्वासाद् भयमुत्पन्नं मूलान्यपि निकृन्तति।।**[१०]

पिङ्गलकः स्वकर्तव्यादेव प्रमत्तः सञ्जीवकेन कृतातिमैत्रिः भृत्यानपि न भृतवान्। एवं विधो दोषः केनापि न करणीयः इति पिङ्गलकवर्तनेन सूचितम्।

**बभुक्षितः किं न करोति पापं**
**क्षीणा जनाः निष्करुणाः भवन्ति।**[११] इति।

पञ्चतन्त्रे एव अन्यत्र व्यक्तित्व नाशनहेतुः क्षुदिति स्पष्टम् उत्पादितम्। करटक–दमनकयोः वृत्तेः नाशादेव तौ सञ्जीवकाय दृह्यतः। अतः पिङ्गलकः व्यक्तित्वविकासाय

प्रत्युदाहरणं भवितुमर्हति। ये ये दोषाः पिङ्गलके दृष्टाः तान्परित्यज्य विद्वान् स्वव्यक्तित्वम् अभिवर्धयेदिति सूचितम्। पिङ्गलकेन कृतः प्रथमो दोषः दुर्जन संसर्गः व्यक्तित्वविकासेच्छुः सदा दुर्जनात् दूरी भवेत्। दन्तिलगोरम्भकथायां दुर्जन हस्तगतः कोऽपि क्षेमेण न एधते इति स्पष्ठमुक्तम्।

© IJICAR 2019, All Rights Reserved

**कोऽर्थान्प्राप्य न गर्वितः विषयिणः कस्यापदोस्तं गताः**

**स्त्रीभिः कस्य न खण्डितं भुवि मनः? को नाम राज्ञां प्रियः।**

**कः कालस्य न गोचरान्तरगतः? कोऽर्थी गतो गौरवं?**

**को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान्।।**[१२]

कर्णेजपैः कृतम् उपजापं कदापि न श्रुणुयात् श्रुतेऽपि तत्र श्रद्धा न कुर्यात्। यतः उपजायः भ्रमरकीटन्यायेन धीमतामपि बुद्धिं विकृतां करोति।

क्रोधः सर्वथा त्याज्यः अशक्तेन क्रोध त्यागः नात्रविवक्षितः शक्तः अपि यः क्षमांकरोति स एव सुखीभवति।

**पूर्वे वयसि यः शान्तः स शान्तः इति मे मतिः।**

**धातुषु क्षीयमाणेषु शमः कस्य न जायते।।**[१३]

पिङ्गलकोऽपि दमनकस्य वाक्यं श्रुत्वा सञ्जीवके जात कोपः सञ्जीवकोऽपि दमनकस्य तन्त्रेणैव प्रणष्टः। अतः प्रथमं सूचकं दूरे स्थापयेत्। पिङ्गलकः सञ्जीवकविषये दमनकेन यदुक्तं सत्य न वा इति क्षणं विचारयति सञ्जीवकं वा स्वयमाहूय कृतं पृच्छति तदा महती आपत् निवारिता भवेदेव। यदि सञ्जीवकवधानन्तरं सत्यं पिङ्गलकेन ज्ञातं तदा यावज्जीवं तस्य पश्चातापात् मोक्षः न भवेदेव। इममर्थं स्वयम् अभ्यूहितवान्।

© IJICAR 2019, All Rights Reserved

**एकं हन्यान्न वा हन्याविषुर्मुक्तो धनुष्मता।**

**बुद्धिर्बुद्धिमता सृष्टाहन्तिराष्ट्रं सनायकम्।।**[१४]

तदहं मायाप्रपञ्चेन गुप्तमाश्रित्य तं स्फोटयिष्यामि। करटक आह–भद्र यदि कथमपि तव मायाप्रवेशं पिङ्गलको ज्ञास्यति। सञ्जीवको वा तदा नूनं विघात एव।

सञ्जीवकः मृगाधिपत्याय यतते इति पिङ्गलकम् उक्तवान्। एवं त्वां ज्ञात्वा स्वामी हन्तुमिच्छतीति सञ्जीवकम् उक्तवान्। एवमन्योन्यकलहोत्पादनेन दमनकस्य कार्यं सिद्धम्। सुहृद्भिः विरोधः कदापि न कार्यः कृतेऽपि विरोधे सामञ्जस्यं प्रथमं चिन्तनीयम्। शत्रुवधे विलम्बेकृतेऽपि बलवता कालान्तरेण साध्यं भवति सुहृत्सुकृतः अपचारः पुनः निवर्तयितुं कोऽपि न शक्नोतीति सुहृद्भेदेन तन्त्रेण सूचितम्। यदाहुः–

**चिरादपि बलात्कारः बलिनः सिद्धयेऽरिषु।**

**छन्दानुवृत्तिदुस्साध्याः सुहृदोविमनीकृताः।।**[१५]

\- - -

## टिप्पणी

१. अष्टाध्यायी,३/३/६९
२. अमरकोशः,१/४/३१
३. अष्टाध्यायी,३/३/१७४
४. अष्टाध्यायी,६/४/४२
५. अष्टाध्यायी,३/३/९४
६. अष्टाध्यायी,३/३/१७४
७. कुमारसम्भवम्.,स.५
८. पञ्चतन्त्रम्–मित्रभेदः–११३ श्लोकः,पृ.सं.७०
९. पञ्चतन्त्रं–मित्रभेदः,श्लो.१३४,पृ.७०
१०. हरिवंशम्,हरिवंशपर्व,(पूजनी ब्रह्मदत्त संवादे),अ.२०,श्लो.१२३
११. पञ्चतन्त्रे,लुब्धप्रमाणाशम्, गङ्गदत्तकथायां,श्लो.१६,पृ.६३१
१२. पञ्चतन्त्रे–मित्रभेदे,श्लो.१५७,पृ.८४
१३. पञ्चतन्त्रे–मित्रभेदः,श्लो.१७६,पृ.९९
१४. पञ्चतन्त्रं–मित्रभेदः,श्लो.२१५,पृ.१२७
१५. शिशुपालवधम्–द्वितीयसर्गे,श्लो.१०५, पृ.८२